सप्तमः पाठः

Lesson - 7

पुत्रवियोगेन दशरथस्य शोकावेगः

काञ्चुकीयः :- (सर्वतो विलोक्य) अहो नु खलु रामनिर्गमनदिनादारभ्य शून्यैवेयम् अयोध्या संलक्ष्यते । कुत :-

नागेन्द्रा यवसाभिलाषविमुखाः सास्रेक्षणा वाजिनो
हेषाशून्यमुखाः सवृद्धवनिताबालाश्च पौरा जनाः ।
त्यक्ताहारकथाः सुदीनवदनाः क्रंदन्त उच्चैर्दिशा
रामो याति यया सदारसहजस्तामेव पश्यन्त्यमी ॥१॥

यावदहमपि महाराजस्य समीपवर्ती भविष्यामि । (परिक्रम्यावलोक्य) अये अयं महाराजो महादेव्या सुमित्रया च सुदुःसहमपि पुत्रविरहसमुद्भवं शोकं निगृह्यात्मानमेव संस्थापयन्तीभ्यामन्वास्यमानस्तिष्ठति । कष्टा खल्ववस्था वर्तते । एष एष महाराजः -

पतत्युत्थाय चोत्थाय हाहेत्युच्चैर्लपन् मुहुः ।
दिशं पश्यति तामेव यया यातो रघूद्वहः ॥२॥

(ततः प्रविशति यथानिर्दिष्टो राजा देव्यौ च ।)

राजा :-

हा वत्स राम जगतां नयनाभिराम
हा वत्स लक्ष्मण सलक्षणसर्वगात्र ।
हा साध्वि मैथिलि पतिस्थितचित्तवृत्ते
हा हा गताः किल वनं बत मे तनूजाः ॥३॥

चित्रमिदं भोः यद्भ्रातृस्नेहात् पितरि विमुक्तस्नेहमपि तावल्लक्ष्मणं द्रष्टुमिच्छामि । वधु वैदेहि -

रामेणापि परित्यक्तो लक्ष्मणेन च गर्हितः ।
अयशोभाजनं लोके परित्यक्तस्त्वयाप्यहम् ॥४॥

पुत्र राम, वत्स लक्ष्मण, वधु वैदेहि, प्रयच्छत मे प्रतिवचनं पुत्रकाः । शून्यमिदं भोः । न मे कश्चित् प्रतिवचनं प्रयच्छति । कौसल्यामातः क्वासि?

सत्यसंन्ध जितक्रोध विमत्सर जगत्प्रिय ।
गुरुशुश्रूषणे युक्त प्रतिवाक्यं प्रयच्छ मे ॥५॥

हा क्वासौ सर्वजनहृदयनयनाभिरामो रामः । क्वासौ मयि गुर्वनुवृत्तिः । क्वासौ शोकार्तेष्वनुकम्पा । क्वासौ तृणवदगणितराज्यैश्वर्यः । पुत्र राम वृद्धं पितरं मां परित्यज्य किमसंबद्धेन धर्मेण ते कृत्यम्! हा धिक् कष्टं भोः-

सूर्य इव गतो रामः सूर्यं दिवस इव
लक्ष्मणोऽनुगतः ।
सूर्यदिवसावसाने छायेव न दृश्यते सीता ॥६॥

(ऊर्ध्वमवलोक्य) भोः कृतान्तहतक

अनपत्या वयं रामः पुत्रोऽन्यस्य महीपतेः ।
वने व्याघ्री च कैकेयी तथा किं न कृतं त्रयम् ॥७॥

कौसल्या :- (सरुदितम्) अलमिदानीं महाराजोऽतिमात्रं संतप्य परवशमात्मानं कर्तुम् । ननु सा तौ च कुमारौ महाराजस्य समयावसाने प्रेक्षितव्या भविष्यन्ति ।

राजा :- का त्वं भोः ।

कौसल्या :- अस्निग्धपुत्रप्रसविनी खल्वहम् ।

राजा :- किं किं सर्वजनहृदयनयनाभिरामस्य रामस्य जननी त्वमसि कौसल्या ।

कौसल्या :- महाराज, सैव मन्दभागिनी खल्वहम् ।

राजा :- कौसल्ये सारवती खल्वसि । त्वया हि खलु रामो गर्भे धृतः ।

अहं हि दुःखमत्यन्तमसह्यं ज्वलनोपमम् ।
नैवं सोढुं न संहर्तुं शक्नोमि मुषितेन्द्रियः ॥८॥

(सुमित्रां विलोक्य) इयमपरा का ।

कौसल्या :- महाराज वत्सलक्ष्मण - (इत्यर्धोक्ते)

राजा :- (सहसोत्थाय) क्वासौ क्वासौ लक्ष्मणः । न दृश्यते भोः कष्टम् ।

(देव्यौ ससंभ्रममुत्थाय राजानमवलम्बेते)

कौसल्या :- महाराज, वत्स लक्ष्मणस्य जननी सुमित्रेति वक्तुं मयोपक्रान्तम् ।

राजा :- अयि सुमित्रे-

तवैव पुत्रः सत्पुत्रो येन नक्तंदिवं वने ।
रामो रघुकुलश्रेष्ठश्छाययेवानुगम्यते ॥९॥

(प्रविश्य)

काञ्चुकीय :- जयतु महाराजः । एष खलु तत्रभवान् सुमन्त्रः प्राप्तः ।

राजा :- (सहर्षमुत्थाय) अपि रामेण ।

काञ्चुकीयः :- न खलु रथेन ।

राजा :- कथं कथं रथेन केवलेन । (इति मूर्च्छितः पतति ।)

देव्यौ :- महाराज समाश्वसिहि समाश्वसिहि । (गात्राणि परामृशतः)

काञ्चुकीयः :- भोः कष्टम् । ईदृग्विधाः पुरुषविशेषा ईदृशीमापदं प्राप्नुवन्तीति विधिरनतिक्रमणीयः । महाराज समाश्वसिहि समाश्वसिहि ।

राजा :- (किञ्चित् समाश्वस्य) बालाके, सुमन्त्र एक एव ननु प्राप्तः ।

काञ्चुकीयः :- महाराज, अथ किम् ।

राजा :- कष्टं भोः-

शून्यः प्राप्तो यदि रथो भग्नो मम मनोरथः ।
नूनं दशरथं नेतुं कालेन प्रेषितो रथः ॥१०॥

तेन हि शीघ्रं प्रवेश्याताम् ।

काञ्चुकीयः :- यदाज्ञापयति महाराजः ।

राजा :-

धन्याः खलु वने वातास्तटाकपरिवर्तिनः ।
विचरन्तं वने रामं ये स्पृशन्ति यथासुखम् ॥११॥

(प्रतिमानाटकम्)

शब्दार्थाः

Meanings

संलक्ष्यते - is visible, नागेन्द्राः - Best elephants, वाजिनः - horses, तनूजाः - children, प्रतिवचनम् - reply, अवगणितः - neglected, समयः -vow, परामृशतः - touch, समाश्वसिहि - have courage, यथासुखम् - happily, काञ्चुकीय - oldest male servant at the harem.

* * *